प्रवेश सं० ४५८९६          विषय: वेद          क्रम सं०

ग्रन्थकार

नाम रुद्री

पत्र सं० १-२२

श्लोक सं०          अक्षर सं० (पंक्तौ) २७          पंक्ति सं० (पृष्ठे) ८

आकार: ८.९" x ६"          लिपि: देवना          आधार: कागज

संवत् १९२९

वि० विवरणम्          000852          आ- ६६५.

पी० एस० यू० पी०—७७ एन० सी० ई०—१६४९—४० ०००

Indira Gandhi National Centre for the Arts

४१८६

मथुरानाथशर्मणः
पुस्तकमिदम् ॥

Indira Gandhi National
Centre for the Arts

रु.द्रि ॥ १॥

श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ श्रीसदाशिवाय नमः॥ कर्मपात्रं
कर्तव्यं॥ भूरसीति भूमिशोधनम्॥ मानोहेति दीपबोधनम्॥ ॐ अद्येत्यमुकगोत्रस्या
ऽमुकशर्मणः शिवप्रीत्यर्थं शिवपरितोषप्रीतये रुद्रिपाठ॥ कर्मणोनिर्विघ्नपरिसमाप्
त्यर्थं गणेशपूजार्थं तथा वैदिकछन्दमंत्र रुद्रिपाठकर्म कर्तुं नानानामगो
त्रान्नानानामशर्मणो ब्राह्मणान् अभिषेचनं गन्धपुष्पाक्षततांबूलवाससोभिस्त्वा
महं वृणे॥ ततो वृतास्म इति ब्राह्मणावरणम्॥ अथ दीपगणेशपूजयेत्॥
अथ कलशस्थापनम्॥ ॐ अद्येत्यादि अमुकगोत्रस्यामुकशर्मणः सपरि
वारस्याऽयुरारोग्यमैश्वर्याद्युत्तरोत्तरहर्षविजयलाभदुःखशमन सर्वारि
ष्टशान्तिपूर्वक यथोक्तफलप्राप्त्यर्थं श्रीरुद्राध्यायस्य परमेष्ठि ऋषिः राम: ॥ १॥

योसावादित्यो रुद्ररूपः स एव रुद्रो देवता गायत्र्यनुष्टुप्पंक्तिजगत्यष्टिछन्दांसि
अच्छिन्नजलधाराशिवोपरिपञ्चामृतस्नानमात्र रुद्रीय षडङ्गमन्त्रैरभिषेक
कलशरक्षापूजनमहं करिष्ये॥ भूरसीति भूमिशोधनम्॥ ॐ धान्यमसीति धा
न्यं स्थाप्य॥ ॐ आजिघ्र कलशमिति तदुपरि कलशं स्थापयेत्॥ वरुणस्योत्त
म्भनमिति निर्मलतीर्थादिजलं प्रक्षिप्य॥ या ओषधीति सर्वौषधिं प्रक्षिप्य॥
या ओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा॥ मनैनुबभ्रूणामहं शतं धामानि
सप्त च॥ ॐ हिरण्यगर्भः समिति पंचरत्नानि॥ ॐ याः फलिनी [illegible] तिफलम्॥
ॐ ओषधयः समिति यवान्॥ ओषधयः समवदन्त सोमेन सह राज्ञा। यस्मै
कृणोति ब्राह्मणस्तं राजन्पारयामसि॥ ॐ गंधद्वारामिति गन्धम्॥

Indira Gandhi National Centre for the Arts

रुद्रि ॐ काण्डात्काण्डेति दूर्वाः ॐ स्योना पृथिवीति पंचमृत्तिका ॐ अश्वत्थे
२ वेति पञ्चपल्लवान् ॐ हिरण्यगर्भ इति वस्त्रयुग्मेन कलशं वेष्टयित्वा ॐ अम्बेऽम्बि
केति आवाहनपर्यन्तं वैस्तोत्रैर्वा आवाह्य ॐ तत्त्वायामीति वरुणमावाह्य कल
शं पूजयेत् ततः कलशे गंगाद्याः सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः
आयान्तु यजमानस्य दुरितक्षयकारकाः इति मन्त्रेणावाहयेत् ॐ कलशस्य
स्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः
स्मृताः कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ऋग्वेदोऽथ यजुर्वेदः सामवे राम: २
दो ह्यथर्वणः अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ततः कलशस्कं
धे गणेशं रक्षां पूजयेत् ॐ अद्येत्यादि रुद्राभिषेककर्मणो निर्विघ्न

परिसमाप्त्यर्थं रुद्रपाठकर्माङ्गतया गणेशरक्षापूजनमहं करिष्ये इति
संकल्प्य गणानां त्वेति गणपतिं पूजयेत् अथ रक्षाबन्धनपूजा रक्षोहणम्
वलगहनं वैष्णवीमिदमहं तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो नि
चखानेदमहं तं वलगमुत्किरामि यं मे सजातो यमसजातो निचखानेदमहं त
त्किरामि स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा स
र्वराडस्यमित्रहा रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वो व
लगहनोऽवनयामि वैष्णवान्रक्षोहणो वो वलगहनोऽवस्तृणामि वैष्णवान्र
क्षोहणौ वां वलगहना उपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ पर्यूहा
मि वैष्णवमसि वैष्णवा स्थ इत्यभिमन्त्रैः पूजयेत् ततः कलशस्कंधे

Indira Gandhi National
Centre for the Arts

रुद्र ३ देशो गणपति सूर्य्य देवी शिव विष्णून् विनायक दुर्गा वायव्याकाशाश्विनी कुमा
रान् सूर्य्य सोम भौम बुध बृहस्पति शुक्र शनैश्चर राहु केतून् ईश्वरोमास्कन्द दु
रि ब्रह्मेन्द्र यम काल चित्रगुप्ताख्यान् आपश्च पृथिवी विष्णु इन्द्राणी प्रजापति सर्प
ब्रह्माख्यान् इन्द्राग्नि यम निऋति वरुण वायु सोम ईशान ब्रह्मानन्ताख्यान् ध्रु
वाधूम्र वस्तून् धात्रादि द्वादशादित्यान् वीरभद्र घेकादश रुद्रान् गौर्य्यादि षो
डश मातृः आवाहादि सप्तमरुता विनायक ब्रह्मादि बिल्वरूद्राऽर्कविन ध्यतीन्
यथालिखितामयारेः पूजयेत् अथ ध्यानम् आत्मानं हि शिवात्मानं पं राम: ३
ध्यायं सापित्तायेद्बुधः त्रिलोचनं चतुर्बाहुं सर्वाभरण भूषितम् नमः शम्भवा
यतिजलस्नानम् तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचो

नमलिरुद्र

दयात् अथावाहनमंत्रः आवाहनं महादेव क्रियते तव तुष्टये आगमने
न देवेश मम शान्ति प्रदो भव अथासनमंत्रः यातं विष्टरं विष्टरेशैव मयादत्तं
यदेवेश प्रभो प्रीत्यर्थं तव देवेश वरदो भव मे सदा अथपाद्यमंत्रः यामिशुम् मयाद
त्तं श्वेत पाद्यं पुष्प गन्ध समन्वितम् गृहाण देवदेवेश प्रसन्नो वरदो भव अथार्घ
मंत्रः शिवितयवसा अर्घोसि त्वमुमाकान्ता वाद्येण नेनवेशप्रभो गृहाणत्वं मया
दत्तं प्रसन्नो भव शंकर अथाचमनीमंत्रः आचमनीय मयादत्तं तव शिव शिवरस्य अथनी ४
येन गृहाण परमेशान तुष्टो भव ममाघवे अथस्नानीयमंत्रः असौयः स्नानीयं
च महादेव दीयते तव तुष्टये मयादत्तं हि देवेश गृहाण परमेश्वर पुनराचम
यमंत्रः असौया पुनराचमनीय वदीयते तव तुष्टये गृहाण देवदेवेश प्र

Indira Gandhi National
Centre for the Arts

ह्रदि ४ शान्तो भव देवेश प्रभो ॥ अथ यज्ञोपवीत मंत्रः ॥ नमोस्तु ॥ यज्ञोपवीतं सौवर्णं
मया दत्तं वरं शंकर ॥ गृहाण परमानंद तुष्टि दो भव शंकर ॥ अथ वस्त्र मंत्रः
ब्रह्मज्ञ ॥ एतद्वासो मया दत्तं सोत्तरीयं सुशोभनम् ॥ गृहाण त्वं सुरश्रेष्ठ
भक्त्या पुष्टि प्रदो भव ॥ अथ चन्दन मंत्रः ॥ श्रीखण्ड चन्दनं ॥ सुगन्धं चन्दनं देव मया
दत्तं च देवेश प्रभो ॥ भक्त्या परमया शंभो सुगन्धं कुंकुमं विभो ॥ अथ पुष्प मंत्रः ॥
यानि पुष्पाणि ॥ पुष्पं देव शंभो मया दत्तं सुशोभनम् ॥ गृहाण देव देवेश मम का
न्ति प्रदो भव ॥ अथाक्षता मंत्रः ॥ पति ॥ अक्षतान्महादेव दीयते तव शान्त श्रमः
ये ॥ अक्षतानां प्रदानेन मम शान्ति प्रदो भव ॥ अथ धूप मंत्रः ॥ वनस्पत्युद्भवः ४
धूपं विशिष्टं परमं सर्वौषधि विजृम्भितम् ॥ गृहाण परमेशान मम शा

न्त्यर्थमेव च ॥ अथ दीप मंत्रः ॥ नमस्ते ॥ दीपावलिं मया दत्तं गृहाण परमेश्व
र ॥ आरार्तिक प्रदानेन मम तेजः प्रदो भव ॥ अथ नैवेद्य मंत्रः ॥ मानः ॥ फलपका
न्न दिनैवेद्यं ताम्बूलादि क्रमेण च ॥ गृहाण त्वं हि देवेश मम भोगार्थमेव च ॥ ॐ
भूर्भुवः स्वः पूजां विसर्जयेत् ॥ अथ पञ्चामृत स्नानम् ॥ आप्यायस्वेति गो
मन्त्रस्य ॥ पंचकरीश्वरायपयसा क्षीरस्नाने विनियोगः ॥ प
तम ऋषिः पयो देवता गायत्री छन्दो ॥ ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ॥ पयस्वतीः प्रदिशः
यः पृथिव्यां पय ऽ ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ॥ पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ गोक्षीर धाम देवेश गोक्षीरेण मया कृतम् ॥ स्नापनं देव दे
वेश गृहाण परमेश्वर ॥ ततः क्षीर स्नानानन्तरं शुद्धोदक स्नानम् ॥ आपो
ह्वि ऽ अस्मान्नित्यस्य प्रजापति ऋषिः त्रिष्टुप् छन्दः आपो देवता शुद्धोद

ओ ४

Indira Gandhi National
Centre for the Arts

रुद्रि ५ क्षालने विनियोगः आपो ऽस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पु
नन्तु विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूत एमि दीक्षा
तपसोस्तनूरसि तां त्वा शिवां शग्मां परिदधे भद्रं वर्णं पुष्यन् पुनः पू
जां कृत्वा भूर्भुवः स्वरिति पूजां विसर्जयेत् ॐ दधिक्राव्णो इति वामदेव ऋषि
र्दधिर्देवता ऽनुष्टुप्छन्दः पूर्ववक्त्रे तत्पुरुषाय दधिस्नाने विनियोगः दधिक्रा
व्णो ऽअकारिषं जिष्णोरश्वस्य वाजिनः सुरभि नो मुखा करत्प्र ण ऽआयूंषि
तारिषत् दध्नाचैव महादेव स्नापनं क्रियते मया उद्गृहाण त्वमया दत्तं सुप्र रुमः ५
सन्नो भवाव्यये पुनः पञ्चोपचारादि ॐ घृतम्मिमिक्ष इति गृत्समद ऋषिस्त्रिष्टुप्
छन्दो घृतं देवता पश्चिमवक्त्रे सद्योजाताय घृतस्नाने विनियोगः ॐ घृतं मिमिक्षे

घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम अनुष्वधमावह मादयस्व स्वा
हाकृतं वृषभ वक्षि हव्यम् सर्पिषा च महादेव स्नापनं क्रियते मया उद्गृहाण श्रद्ध
या दत्तं तव प्रीत्यर्थमेव च पुनः पञ्चोपचारादि ॐ मधुवातेति गोतम ऋषिर्मधु
देवता गायत्री छन्दो दक्षिणवक्त्रे अघोराय मधुस्नाने विनियोगः ॐ मधुवाता ऽ
ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः इदं मधु मया दत्तं तव तुष्ट्य
र्थमेव च उद्गृहाण त्वं हि देवेश मम शान्तिप्रदो भव पुनः पञ्चोपचारादि ॐ
अपाꣳरसमित्यस्य इन्द्र बृहस्पति ऋषिरनुष्टुप्छन्दो सदाशिवो देवता उत्तरव
क्त्रे वामदेवाय शर्करास्नाने विनियोगः ॐ अपाꣳरसमुद्वयसꣳ सूर्ये सन्त
ꣳ समाहितम् अपाꣳरसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतो

Indira Gandhi National
Centre for the Arts

रुद्र
८ री न्त्र यन्त्वा जुष्टद्यु लो स्त्रियस्ते योनिरिन्द्राय त्वा जुष्टतमम् सितया सहदेवे
श स्नापनं क्रियते मया । गङ्गाया अद्ध्याहृतं सुप्रशान्तो भव प्रभो । पुनः पञ्चोपचा
रादि एवं पञ्चामृतेनैव स्नापनीयो वृषध्वजः । उपचारं षोडशकं ततः कुर्या
त्सुबुद्धिमान् । षडङ्गमन्त्राणि च श्रीमहारुद्रं परि । क्षिप्तजलधारया भिषिञ्चे
दिति ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ
हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम । आहमजानि गर्ब्भधमा
त्वमजासि गर्ब्भधम् १ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह । बृहत्युष्णिहा रामः
ककुप्सूचीभिः शम्यन्तु त्वा २ सहस्तोमाः सहछन्दस आवृतः सहप्र ८
मा ऋषयः सप्त दैव्याः पूर्वेषाम्पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो

---

न रश्मीन् ३ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति । दूरङ्गमञ्ज्यो
तिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु १ येन कर्म्माण्यपसो मनीषिणो
यज्ञे कृण्वन्ति विदथेषु धीराः । यदपूर्वं यक्षमन्तः प्रजानान्तन्मे मनः शिवस
ङ्कल्पमस्तु २ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु । यस्मा
न्न ऋते किञ्चन कर्म्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ३ येनेदम्भूतम्
भुवनम्भविष्यत्परिगृहीतममृतेन सर्वम् । येन यज्ञस्तायते सप्तहोता तन्मे म
नः शिवसङ्कल्पमस्तु ४ यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता
रथनाभाविवाराः । यस्मिꣳश्चित्तꣳ सर्वमोतम्प्रजानान्तन्मे मनः शिवसङ्कल्प
मस्तु ५ सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव

Indira Gandhi National
Centre for the Arts

हृदि ७

हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥६॥ ॐ हृदयाय नमः
॥ सहस्रशीर्षा पूरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिं सर्वतस्पृत्वात्यतिष्ठ
द्दशाङ्गुलम् ॥१॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ॥ उतामृतत्वस्येशानो
यदन्नेनातिरोहति ॥२॥ एतावानस्य महिमातो ज्यायांश्च पूरुषः ॥ पादो
ऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥ त्रिपादूर्ध्व उदैत्पुरुषः पादो
ऽस्येहाभवत्पुनः ॥ ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥४॥ ततो
विराडजायत विराजो अधि पूरुषः ॥ स जातो अत्यरिच्यत पश्चाद्भूमिमथो पु
रः ॥५॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ॥ पशूंस्तांश्चक्रे वाय
व्यानारण्या ग्राम्याश्च ये ॥६॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञि

रामः ७

रे ॥ छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥ तस्मादश्वा अज
आयन्त ये के चोभयादतः ॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥८॥
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ॥ तेन देवा अयजन्त साध्या
ऋषयश्च ये ॥९॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥ मुखं किमस्या
सीत्किं बाहू किमूरू पादा उच्येते ॥१०॥ ब्राह्मणोऽस्य मुखमासीद्बाहू राज
न्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥११॥ चन्द्रमा मन
सो जातश्चक्षोः सूर्यो अजायत ॥ श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजा
यत ॥१२॥ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ॥ पद्भ्यां भूमिर्दिशः
श्रोत्रात्तथा लोकाँ अकल्पयन् ॥१३॥ यत्पुरुषेण हविषा देवा यज्ञमत

Indira Gandhi National
Centre for the Arts

न्वत ॥ वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥ सप्तास्यास
रुद्रि न्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञन्तन्वाना अबध्नन्पुरुषम्प
८ शुम् ॥ १५ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्। तेह
नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥ ॐ भूर्भुवः स्वः शिरसे
स्वाहा ॥ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्म्मणः समवर्त्तताग्रे। तस्य
त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥ वेदाहमेतम्पुरुष
म्महान्तमादित्यवर्णन्तमसः परस्तात्। तमेव विदित्वाति मृत्युमेति नान्यः प एमः
न्था विद्यतेऽयनाय ॥ १८ ॥ प्रजापतिश्चरति गर्भेऽन्तरजायमानो बहुधा विजाय ८
ते। तस्य योनिम्परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥ यो

देवेभ्य आतपति यो देवानाम्पुरोहितः। पूर्वो यो देवेभ्यो जातो नमो रुचा
य ब्राह्मये ॥ २० ॥ रुचम्ब्राह्मञ्जनयन्तो देवा अग्रे तदब्रुवन्। यस्त्वैवम्ब्राह्म
णो विद्यात्तस्य देवा असन्वशे ॥ २१ ॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे
पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्म इषाण स
र्वलोकम्म इषाण ॥ २२ ॥ ॐ भूर्भुवः स्वः शिखायै वषट्। हरिः ॐ आशुः शि
शानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। संक्रन्दनेनानि
मिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत तत्स
हध्वं युधो नर इषुहस्तेन वृष्णा ॥ २ ॥ स इषुहस्तैः स निषङ्गिभिर्वशी स
ँसृष्टा स युध इन्द्रो गणेन। संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा

३ संक्रन्दनो निमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥ १

Indira Gandhi National
Centre for the Arts

हृ.द्रि प्रतिहिताभिरस्ता ३ बृहस्पते परि दीया रथेन रक्षोहामित्राँ२ऽ अपबा
९ धमानः प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्
४ बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः अभिवी
रो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ५ गोत्रभिदं गोविदं
वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा इमं सजाता अनु वीरयध्वमिन्द्रं
ऽसखायो अनु सं रभध्वम् ६ अभि गोत्राणि सहसा गाहमानो दयो वी
रः शतमन्युरिन्द्रः दुश्च्यवनः पृतनाषाड युध्योऽस्माकं सेना अवतु राम:
प्र युत्सु ७ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः देव ९
सेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ८ इन्द्रस्य वृष्णो

वरुणस्य राज्ञ आदित्यानां मरुतां शर्द्ध उग्रम् महामनसां भुवनच्य
वानां घोषो देवानां जयतामुदस्थात् ९ उद्धर्षय मघवन्नायुधान्युत्सत्वना
मामकानां मनांसि उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु
घोषाः १० अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु
अस्माकं वीरा उत्तरे भवन्त्वस्माँ२ऽ उ देवा अवता हवेषु ११ अमी
षां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि अभि प्रेहि निर्दह हृ
त्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् १२ अवसृष्टा परा पत शरव्ये ब्रह्म
संशिते गच्छामित्रान्प्रपद्यस्व मामीषां कञ्चनोच्छिषः १३ प्रेता जयता
नर इन्द्रो वः शर्म यच्छतु उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ १४

Indira Gandhi National
Centre for the Arts

हा॰द्र
१०

असौ या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्धमाना। तां गूहत तमसा
पव्रतेन यथामी अन्यो अन्यं न जानन् ॥ १५ ॥ यत्र बाणाः संपतन्ति कुमा
रा विशिखा इव। तन्न इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म
यच्छतु ॥ १६ ॥ मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानुवस्ताम्
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥ १७ ॥ ॐ भूर्भुवः
स्वः कवचाय हुं ॥ हरिः ॐ विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपताववि
हुतम्। वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ॥ १ ॥ उदु त्यं राम:
जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥ २ ॥ येना पावक चक्ष ॥१०॥
सा भुरण्यन्तं जनाँ॥ अनु। त्वं वरुण पश्यसि ॥ ३ ॥ दैव्यावध्वर्यू आ

गतं रथेन सूर्यत्वचा। मध्वा यज्ञं समञ्जाथे। तं प्रत्नथायं वेनश्चित्रं देवाना
म् ॥ ४ ॥ आ न इडाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु। अपि यथा यु
वानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥ ५ ॥ यदद्य कच्च वृत्रहन्नुदगा अ
भि सूर्य सर्वं तदिन्द्र ते वशे। तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य विश्वमा
भासि रोचनम् ॥ ६ ॥ तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं
जभार। यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥ ७ ॥ तन्मि
त्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे। अनन्तमन्यद्रुशदस्य पा
जः कृष्णमन्यद्धरितः सं भरन्ति ॥ ८ ॥ बण्महाँ असि सूर्य बडादित्य मह
ाँ असि। महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ॥ ९ ॥ बट् सूर्य

रु॰ दि॰ अवसा महाँ२ असि सत्रा देव महाँ२ असि ॥ महा देवानामसुर्यः पुरो
॥११॥ हितो विभु ज्योतिरदाभ्यम् ॥१०॥ आयन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत । व
सूनि जाते जनमान ओजसा प्रति भागन्न दीधिम ॥११॥ अद्या देवा उदिता सू
र्यस्य निरंहसः पिपृता निरवद्यात् । तन्नो मित्रो वरुणो मामहन्तामदितिः सि
न्धुः पृथिवी उत द्यौः ॥१२॥ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्त्य
ञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥१३॥ ॐ भूर्भु
वः स्वः । नेत्रत्रयाय वौषट् । हरिः ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः
बाहुभ्यामुत ते नमः ॥१॥ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया न रामः
स्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥२॥ यामिषुं गिरिशन्त हस्ते बि ११

भर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥३॥ शिवेन वच
सा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् ॥४॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च
यातुधान्यो धराचीः परा सुव ॥५॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुम
ङ्गलः । ये चेमां रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषां हेड ईमहे ॥६॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृश्रन्नदृश्र
न्नुदहार्यः स दृष्टो मृडयाति नः ॥७॥ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मी
ढुषे । अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥८॥ प्रमुञ्च धन्वनस्त्वमुभ
योरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप ॥९॥ विज्यं धनुः

Indira Gandhi National
Centre for the Arts

रुद्र
१२

कपर्द्दिनो विशल्यो वाणवाँ२ऽउत । अनेशन्नस्य याऽइषवऽआभुरस्य नि
षङ्गधिः ॥ १० ॥ या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽस्मान्विश्वतस्त्व
मयक्ष्मया परिभुज ॥ ११ ॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो
यऽइषुधिस्तवारेऽअस्मन्निधेहि तम् ॥ १२ ॥ अवतत्य धनुष्ट्वꣳ सहस्राक्ष
शतेषुधे । निशीर्य्य शल्यानां मुखा शिवो नः सुमना भव ॥ १३ ॥ नमस्तऽआ
युधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ १४ ॥
मा नो महान्तमुत मा नोऽअर्ब्भकम्मा नऽउक्षन्तमुत मा नऽउक्षितम् । मा नो
वधीः पितरम्मोत मातरम्मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १५ ॥ मा नस्तोके त रामः १२
नये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः । मा नो वीरान्रुद्र भामि

नो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ १६ ॥ ॐ भूर्भुवः स्वः अस्त्राय
फट् । पुन नमस्तेध्वाऽभ्याः । नमो हिरण्यबाहवे सेनान्ये दिशां च पतये न
मो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमो नमः शष्पिञ्जराय त्विषीमते
पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमो नमो बभ्लु
शाय ॥ १७ ॥ नमो बभ्लुशाय व्याधिनेऽन्नानाम्पतये नमो नमो भवस्य हेत्यै जगतां
म्पतये नमो नमो रुद्रायाततायिने क्षेत्राणाम्पतये नमो नमः सूतायाहन्त्यै व
नानाम्पतये नमो नमो रोहिताय ॥ १८ ॥ नमो रोहिताय स्थपतये वृक्षाणाम्पत
ये नमो नमो भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रिणे वाणि
जाय कक्षाणाम्पतये नमो नमऽउच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमो न

Indira Gandhi National
Centre for the Arts

रुद्रि मः कृत्स्नायतया १९ नमः कृत्स्नायतयाधावतेसत्त्वनाम्पतयेनमो
१३ नमःसहमानायनिव्याधिनऽआव्याधिनीनाम्पतयेनमोनमोनिषङ्गिणेक
कुभायस्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्यानाम्पतयेनमोनमोव
ञ्चते २० नमोवञ्चतेपरिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषु
धिमतेतस्कराणाम्पतयेनमोनमःसृकायिभ्योजिघांसद्भ्योमुष्णताम्पतयेन
मोनमःसिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः २१ नमऽउष्णीषिणे
गिरिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवोनमोन रामः
मऽआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमोनमऽआयच्छद्भ्योस्यद्भ्यश्चवोन १३
मोनमोविसृजद्भ्यः २२ नमोविसृजद्भ्योविध्यद्भ्यश्चवोनमोनमःस्वपद्भ्यो
द्भ्य

जाग्रद्भ्यश्चवोनमोनमःशयानेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्यो
धावद्भ्यश्चवोनमोनमःसभाभ्यः २३ नमःसभाभ्यःसभापतिभ्यश्चवोनमोन
मःअश्वेभ्योश्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योविविध्यन्तीभ्यश्च
वोनमोनमऽउगणाभ्यस्तृंहतीभ्यश्चवोनमोनमोगणेभ्यः २४ नमोग
णेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृ
त्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमो
नमःसेनाभ्यः २५ नमःसेनाभ्यःसेनानिभ्यश्चवोनमोनमोरथिभ्योऽअर
थेभ्यश्चवोनमोनमःक्षत्तृभ्यःसंग्रहीतृभ्यश्चवोनमोनमोमहद्भ्योऽअर्भ
केभ्यश्चवोनमः २६ नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमःकुला

Indira Gandhi National
Centre for the Arts

रुद्रि
१४

लेभ्यः कर्म्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः
श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः ॥ २७ ॥ नमः श्वभ्यः श्वपतिभ्य
श्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्री
वाय च शितिकण्ठाय च नमः कपर्दिने ॥ २८ ॥ नमः कपर्दिने च व्युप्तकेशाय च
नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मी
ढुष्टमाय चेषुमते च नमो ह्रस्वाय ॥ २९ ॥ नमो ह्रस्वाय च वामनाय च नमो बृ
हते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमो ग्र्याय च प्रथमाय च नम आ रामः
शवे ॥ ३० ॥ नम आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नम ऊर्म्या १४
य चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥ ३१ ॥ नमो ज्येष्ठाय च कनि

ष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्या
य च बुध्न्याय च नमः सोभ्याय ॥ ३२ ॥ नमः सोभ्याय च प्रतिसर्याय च नमो याम्या
य च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नम उर्वर्याय च खल्याय च न
मो वन्याय ॥ ३३ ॥ नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च न
म आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च नमो बिल्मिने ॥ ३४ ॥
नमो बिल्मिने च कवचिने च नमो वर्म्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च
नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे ॥ ३५ ॥ नमो धृष्णवे च प्रमृशाय च
नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्व
ने च ॥ ३६ ॥ नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च स

Indira Gandhi National
Centre for the Arts

रुद्र
१५

रस्याऽयवनमोनादेयायवैशंतायवनमःकूल्याय ३७ नमःकूप्यायवाव
ट्याऽयवनमोवीध्र्यायवातप्याऽयवनमोमेघ्यायवविद्युत्याऽयवनमोवर्ष्याय
यँनमोवाँर्ष्याय ३८ नमोवात्यायवरेष्म्यायवनमोवास्तव्याऽयववास्तुप
यवनमःसोमायवरुद्रायवनमस्ताम्रायवारुणायवनमःशङ्गव ३९ नमः
शङ्कवेवपशुपतयेवनमऽउग्रायवभीमायवनमोऽग्रेवधायवदूरेवधायवन
मोहन्त्रेवहनीयसेवनमोवृक्षेभ्योहरिकेशेभ्योनमस्ताराय ४० नमःशम्भवाय
वमयोभवायवनमःशङ्करायवमयस्करायवनमःशिवायवशिवतरायव रामः
४१ नमःपार्यायवावार्यायवनमःप्रतरणायवोत्तरणायवनमस्तीर्थ्या १५
यवकूल्यायवनमःशष्प्यायवफेन्यायवनमःसिकत्याऽय ४२ नमः

सिकत्याऽयवप्रवाह्याऽयवनमःकिꣳशिलायवक्षयणायवनमःकपर्दिने
वपुलस्तयेवनमऽइरिण्याऽयवप्रपथ्याऽयवनमोव्रज्याय ४३ नमोव्रज्या
यवगोष्ठ्यायवनमस्तल्प्यायवगेह्यायवनमोहृदय्याऽयवनिवेष्यायवनमः
काट्यायवगह्वरेष्ठायवनमःशुष्क्याय ४४ नमःशुष्क्यायवहरित्याऽय
वनमःपाꣳसव्याऽयवरजस्याऽयवनमोलोप्यायवोलप्याऽयवनमऽऊ
र्व्यायवसूर्म्यायवनमःपर्णाय ४५ नमःपर्णायवपर्णशदायवनमऽउ
द्गुरमाणायवाभिघ्नतेवनमऽआखिदतेवप्रखिदतेवनमऽइषुकृद्भ्योध
नुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाꣳहृदयेभ्योनमोविचिन्वत्के
भ्योनमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः ४६ द्रापेऽअन्धसस्पते

Indira Gandhi National
Centre for the Arts

रुद्रि ॥१८॥ द्रद्र नील लोहित । आसां प्रजानामेषां पशूनां माभेर्मारो मो एषां किंचनः कि
ञ्चनाममत् ॥ ४७ ॥ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ॥ य
था शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ ४८ ॥ या ते रु
द्र शिवा तनूः शिवा विश्वाहा भेषजी । शिवा रुतस्य भेषजी तया नो मृड जीवसे
॥ ४९ ॥ परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ॥ अवस्थिरा
मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥ ५० ॥ मीढुष्टम शिवतम शिवो
नः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बि रामः
भ्रदागहि ॥ ५१ ॥ विकिरिद्र विलोहित नमस्ते अस्तु भगवः । यास्ते स १८
हस्रं हेतयोन्यमस्मन्निवपन्तु ताः ॥ ५२ ॥ सहस्राणि सहस्रशो बाह्वोस्तव

हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥ ५३ ॥ असंख्याता सह
स्राणि ये रुद्रा अधि भूम्याम् । तेषां सहस्रयोजनेव धन्वानि तन्मसि ॥ ५४ ॥
अस्मिन्महत्यर्णवेन्तरिक्षे भवा अधि । तेषां सहस्रयोजनेव धन्वा
नि तन्मसि ॥ ५५ ॥ नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः । तेषां स
हस्रयोजनेव धन्वानि तन्मसि ॥ ५६ ॥ नीलग्रीवाः शितिकण्ठाः शर्वा अ
धः क्षमाचराः । तेषां सहस्रयोजनेव धन्वानि तन्मसि ॥ ५७ ॥ ये वृक्षेषु
शष्पिञ्जरा नीलग्रीवा विलोहिताः । तेषां सहस्रयोजनेव धन्वानि तन्म
सि ॥ ५८ ॥ ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषां सहस्रयो
जनेव धन्वानि तन्मसि ॥ ५९ ॥ ये पथां पथिरक्षय ऐलबृदा आयुर्युधः

Indira Gandhi National Centre for the Arts

रुद्रि ७७ तेषाᳪं सहस्रयोजनेव धन्वानि तन्मसि ६० ये तीर्थानि प्रचरंति सृका
हस्ता निषंगिणः तेषाᳪं सहस्रयोजनेव धन्वानि तन्मसि ६१ येन्नेषु वि
विध्यंति पात्रेषु पिबतो जनान् तेषाᳪं सहस्रयोजनेव धन्वानि तन्मसि ६२
यऽएतावन्तश्च भूयाᳪंसश्च दिशो रुद्रा वितस्थिरे तेषाᳪं सहस्रयोज
नेव धन्वानि तन्मसि ६३ नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः ते
भ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्यो नमो
ऽस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ६४ रामः ७७
नमोस्तु रुद्रेभ्यो येन्तरिक्षे येषां वात इषवः तेभ्यो दश प्राचीर्दश दक्षिणा
दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्यो नमोऽस्तु ते नो वन्तु ते नो मृडयन्तु

नजुतो २

दिशोदीची २

ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ६५ नमोस्तु रुद्रेभ्यो ये पृथि
व्यां येषामन्नमिषवः तेभ्यो दश प्राचीर्द श दक्षिणा दश प्रतीचीर्दशोर्ध्वाः
तेभ्यो नमोऽअस्तु ते नो वन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां
जम्भे दध्मः ६६ पुनः नमस्ते योऽध्यायः पठेत् १६ एष ते रुद्र भागः स
ह स्वस्राम्बिकया तं जुषस्व स्वाहैष ते रुद्र भाग आखुस्ते पशुः १ अवरुद्रम
दीमह्यव देवं त्र्यम्बकम् यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा
नो व्यवसाययात् २ नमस्ते रुद्र मन्यव उतो त इषवे नमः बाहुभ्या
मुत ते नमः १ या ते रुद्र शिवा तनूरघोरापापकाशिनी तया नस्तन्वा शंतम
या गिरिशंताभिचाकशीहि २ न तं विदाथ य इमा जजानान्यद्युष्माक

Indira Gandhi National
Centre for the Arts

रुद्रि
२०

मन्तारश्चभूव ॥ नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरन्ति ॥ १ ॥
विश्वकर्म्मा ह्यजनिष्टदेवऽआदिद्गन्धर्वोऽअभवद्द्वितीयः ॥ तृतीयः पिता
जनितौषधीनामपाङ्गर्भंव्यदधात्पुरुत्रा ॥ २ ॥ मीढुष्टमशिवतमशिवोनःसु
मनाभव । परमेवृक्षऽआयुधन्निधायकृत्तिंवसानऽआचरपिनाकम्बिभ्रद
गहि ॥ १ ॥ विकिरिद्रविलोहितनमस्तेऽअस्तुभगवः । यास्तेसहस्रंहेतयो
न्यमस्मन्निवपन्तुताः ॥ २ ॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः । तासा
मीशानोभगवःपराचीनामुखाकृधि ॥ ३ ॥ असंख्यातासहस्राणियेरुद्रा रामः
ऽअधिभूम्याम् । तेषांसहस्रयोजनेवधन्वानितन्मसि ॥ ४ ॥ वयंसोम २०
व्रतेतवमनस्तनूषुबिभ्रतः । प्रजावन्तःसचेमहि ॥ १ ॥ एषतेरुद्रभागः

सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ २ ॥ अ
वरुद्रमदीमह्यवदेवन्त्र्यम्बकम् । यथानोवस्यसस्करद्यथानःश्रेयस
स्करद्यथानोव्यवसाययात् ॥ ३ ॥ भेषजमसिभेषजङ्गवेऽश्वायपुरुषायभे
षजम् । सुखम्मेषायमेष्यै ॥ ४ ॥ त्र्यम्बकंयजामहेसुगन्धिंपुष्टिवर्द्धनम् ।
उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् । त्र्यम्बकंयजामहेसुग
न्धिंपतिवेदनम् । उर्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥ ५ ॥ एतत्तेरु
द्रावसन्तेनपरोमूजवतोऽतीहि । अवततधन्वापिनाकावसःकृत्तिवासाऽ
अहिंसन्नःशिवोऽतीहि ॥ ६ ॥ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् ।
यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ ७ ॥ शिवोनामासिस्वधितिस्ते

Indira Gandhi National
Centre for the Arts

रुद्रि पितानमाता ऽऽमाननुमा माहिंसीः॥ निवर्तयाम्यायुषेन्नाद्याय प्रजननाय
१२ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ ८ ॥ अथ शान्तिपाठः॥ हरिः ॐ
उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च॥ सासह्वांश्चाभियुग्वा च विक्षिपः
स्वाहा ॥ १ ॥ अग्निं हृदयेनाशनिं हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भ
वं यक्ना॥ शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तः पर्शव्येनोग्रं दे
वं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥ २ ॥ उग्रं लोहितेन मित्रं सौ
व्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान् प्रमुदा॥ भवस्य क राम:
ण्ठ्यं रुद्रस्यान्तः पार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् १८
॥ ३ ॥ वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च

म स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे
यज्ञेन कल्पन्ताम् ॥ १ ॥ प्राणश्च मे पानश्च मे व्यानश्च मे सुश्च मे चित्तञ्च
म ऽ आधीतञ्च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रञ्च मे दक्षश्च मे बल
ञ्च मे यज्ञेन कल्पन्ताम् ॥ २ ॥ अवेताश्चम्पद्युमनो यजुः पथ सामप्राणा
प्रपद्ये वक्षुः श्रोत्रं प्रपद्ये॥ वागोजः सहौजो मयि प्राणापानौ ॥ १ ॥ य
न्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु
शन्नो भवतु भुवनस्य यस्पतिः ॥ २ ॥ भूर्भुवः स्वः तत्सवितुर्वरेण्यम्भर्गो दे
वस्य धीमहि॥ धियो यो नः प्रचोदयात् ॥ ३ ॥ अग्निर्देवता वातो देवता सू
र्यो देवता चन्द्रमा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ १ ॥ वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वे देवा देवता १

स्तुदि
२०

पृथिव्यामप्स्वोषधीषु यो दिव्यन्तरिक्षे योधाः पयस्वतीः प्रदिशः स
न्तु मह्यम् २ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णो
र्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ३ नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्व
र्चिषे अन्यांस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यं शिवो भव १ न
मस्ते ऽअस्तु विद्युते नमस्ते स्तनयित्नवे नमस्ते भगवन्नस्तु यतः स्वः
समीहसे २ यतो यतः समीहसे ततो नो ऽअभयं कुरु शन्नः कुरु प्रजाभ्यो
ऽभयन्नः पशुभ्यः ३ स्वस्ति न ऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः रामः
स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु १ विश्वा २०
नि देव सवितर्दुरितानि परासुव यद्भद्रं तन्न ऽआसुव १ ईशावास्यमि

दꣳ सर्वं यत्किञ्च जगत्यां जगत् तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्वि
द्धनम् १ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः एवन्त्वयि नान्यथेतो
स्ति न कर्म लिप्यते नरे २ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरा
पः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शा
न्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि १ तच्चक्षुर्देवहित
म्पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम
शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः
शतात् १ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः यथा
शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टं ग्रामे ऽअस्मिन्ननातुरम् १ नमः

Indira Gandhi National Centre for the Arts

रुद्रि ॥२१॥ शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च
शिवतराय च ॥ १ ॥ हिरण्मयेन पात्रेण सत्यस्यापिहितम्मुखम् ॥ योसावादि
त्ये पुरुषः सोसावहम् ॥ १ ॥ इति रुद्राभिषेकमन्त्राः ॥ शुभम् ॥ लिंग शिव
रुद्रि आवृत्ति ११ लघुरुद्रि १२१ महारुद्रि आवृत्ति १३३१ अतिरुद्रि १४६४
ॐ महादेवाय विद्महे रुद्रमूर्तये धीमहि तन्नो शिव प्रचोदयात् ॥ १ ॥ मह
रुद्रि १३३१ जप २६६ नमः शिवाय पायस तिल जौ होम १०८ नमः शिवाय
स्वाहा तर्पण २७ शिवाय शिव तर्पयामि मार्जन ३ नमोयमवमार्जया राम:
मि ॥ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः ॥२१॥
शिवाय च शिवतराय च ॥ १ ॥ शिवाय नमः ॥ इति सम्वत् १८२९ साल मि

रुद्रि ॥२२॥ ति कार्तिक शुदि ६ रोज ४ का पूर्णा लिखितमिदं पुस्तकम् शुभम्भूयात् ॥ राम:
वज्रतुराड महाकाय वज्रतुराड म[illegible] वल ॥ हनासिन तुराडेन भूमिं [illegible] महाज्वर ॥१॥

राम: २२

४१८६१

Indira Gandhi National
Centre for the Arts